श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्री वसुमतीशतकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वसुमतीशतकम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

वन्दे वेङ्कटशेषदेशिकमणिं वैदुष्यवारान्निधिं
वंशे वत्सगुरोः कृतावतरणं यस्यातितुङ्गे हृदि।
वर्ण्येयं वसुधा, स वाजिवदनः, सा श्रीगुरूणां ततिः
सा च श्रीकविता मनोहरतमा चक्रुर्विहारान् बहून्॥ 1 ॥

वसुमति ! वरदा त्वं पूर्ववर्णं गृहीत्वा
मयि भव सुमतित्वं शिष्टमेतन्ममास्तु।
अथ किल भवदीयां स्तोत्रचर्यां विधातुं
मम मतिरतिपुण्या सम्भवित्री धरित्रि !॥ 2 ॥

वसुधे ! सुधेव मम भारती त्वया
कृपया कृता किल भविष्यति ध्रुवम्।
वसुदा ततश्च भवती भविष्यती -
त्यखिलं विभाति तव नाम्नि मेऽवने॥ 3 ॥

तव श्रवणतो भवन् तव जगौ सुतायाः कथां
ततश्श्रवणजस्तव स्तवमनर्घभावं गुरुः।
अहं श्रवणजन्मवान्नहि तथाऽपि वक्ष्यामि तत् -
कतिश्रवणजातया मम मनीषया प्रेरितः॥ 4 ॥

मार्कण्डेयमहर्षिणा तव कृतं पित्रा तपः किं महत्?
किं वा श्रीनिधिना तव प्रिय इति प्राप्तेन कीर्तिं कृतम्?।
किं वा श्रीनिधिराघवेण रचितं तुष्टूषता त्वां मया
सर्वत्रात्र रसे! त्वमेव निपुणा मातस्समाधिं वद॥ 5॥

विश्वम्भरस्स भगवान् भवतीं बिभर्ति
विश्वम्भरा नु भवती तममुं बिभर्ति।
हा! हन्त! निश्चितममुं भवती बिभर्ति
विश्वाभरस्स भविता कथितोऽन्यथा चेत्॥ 6॥

वराहरूपी स पुरा मुरारिः
त्वां प्राप्य जायामसमस्तवेति।
मनोहराकाररमानिवासः
त्वामेति जायां तुलसीवनेऽस्मिन्॥ 7॥

स्नेहाभिषिक्तं यदि वैरमास्ते
न तच्चकास्तीति भुवि प्रसिद्धम्।
स्नेहाभिषिक्तं मधुवैरिणस्ते
भूषासु वैरं नितरां विभाति॥ 8॥

अधरमधुनि सक्तं मध्वरिं मारबद्धं
कलयसि कथमेनं मातरत्यन्तचित्रम्।
अथ किल तव सङ्गात् श्रीनिधेरस्य चाभूत्
अघटितघटकत्वं वर्णितं मारजेन॥ 9॥

स्वरूपन्ते मातः! कतिचन जना मन्दधिषणाः
गिरीन्द्रैर्वृक्षौघैरपि च निचयैर्मेदुरमृदाम्।
विलोकन्ते लेखप्रियपथपुरीं तामपि रसे!
त्वदीयान्तःकोणे क्वचिदपि गतां नैव किमिदम्॥ 10॥

विश्वम्भरासि निखिलासि तथापि मातः !
केनाऽपि हन्त ललितेन मनोहरेण।
रूपेण तेन दयितेन तथाविधेन
श्रीलेखमार्गनगरे विहृतिं तनोषि॥ **11** ॥

अम्ब ! त्वां किल नायकस्य निकटे भान्तीं मनोहारिणीं
दृष्ट्वा नन्दथुमेव याति नियतं लक्ष्मीस्सपत्नी तव।
यो भूम्याः पतिरुन्नतो विजयते तस्मिन् हि लक्ष्मीः स्थिरा
तस्मात्त्वामवलम्बते स्थितिरियं तस्याश्च तस्मादिदम्॥ **12** ॥

वसुन्धरे ! त्वां श्रवणोद्भवोऽयं
सम्प्राप्य सम्प्राप्य ततः फलानि।
आदाय तेभ्यो वसु तत्स्वरूपां
लक्ष्मीमुरःपेटिकया बिभर्ति॥ **13** ॥

लक्ष्मीपतिस्सन्ननघां महीं त्वां
स मातरादाय मृकण्डुसूनोः।
वसुन्धरानाथपदं प्रपेदे
नोचेदिहाकाशपुरीपतिस्स्यात्॥ **14** ॥

त्वामेकां वसुधे ! मृकण्डुतनयः कन्यामनन्यां ददौ
श्रीमच्छ्रीपतये न चान्यदददत् यद्वाऽददात्तेन किम्?।
एतेनैव स गां भुवं च भवतीदानेन संयग्ददौ
इत्येवं भुवने तु कीर्तिरभवच्चित्रा त्वदीया दया॥ **15** ॥

मधुरा धरणि ! गिरस्ते
मधुजिदपि श्रोतुमुत्सुको नितराम्।
श्रवणे जनिमथ सुरपथ -
नगरीनाथत्वमप्याप॥ **16** ॥

अहोरात्राभिख्ये सरसि शुभदं स्नानकरणम्
अहोरात्रं ध्येयं किमपि तटगं तस्य सरसः।
अहोरात्रं यत्तत् कनकरुचि कृष्णेन घटितम्
अहोरात्राभिख्यां युगपदिव युक्तां प्रथयति॥ **17**॥

पुराणपुरुषप्रिया पुरभिदादिभिः पूजिता
पुरन्दरपदप्रदा निजपदं सकृत् ध्यायताम्।
पुरातनसरस्वतीं पुलकितां गुणैस्तन्वती
पुनातु दितिसम्भवप्रतिभटाध्वपुर्यालया॥ **18**॥

कान्ताप्रियो यदि भवेत्तनयोऽपि साध्व्याः
त्याज्यस्तदा किल सतीति निगद्यते सा।
साध्व्यास्तवाम्ब ! नरकारिसरोजनेत्रे !
हृद्यास्त्यजन्ति नरकं नरकाम्ब ! भक्ताः॥ **19**॥

स्वयं मधुरभाषिणी मधुहरं सदा सेवसे
भवेन परिपूजिता भवमहो लुनासि स्वयम्।
अभूमिरपि मद्गिरामथ च भूमिरित्युच्यसे
कथं नु तव वैभवं कमललोचने ! वर्णये॥ **20**॥

अनन्त इति नामवान् स्वयमसावनन्ता गिरः
स्तुवन्ति तममुं ततोऽप्ययमनन्ततल्पे रतः।
अनन्तगिरिनायको भगवति ! त्वयानन्तया
मृकण्डुसुतबालया स्वसमयात्र संमोदते॥ **21**॥

भूमिस्त्वं यमुना ततः कचभरं गङ्गा च मन्दस्मितं
कावेरी मधुरं वचो जननि ! ते वैहायसी मध्यगा।
भूषा स्वर्णमुखी युगी च कुचयोस्तद्वत्पयस्विन्यसौ
इत्थं पुण्यनदीमयीमिव रसे ! त्वां सेवते श्रीनिधिः॥ **22**॥

गतिस्त्वं देवानां गगननिभमध्या घनकुचा
    तथानन्ता नाम्ना कटितटगदिव्याम्बरवती।
सनक्षत्रा पुष्पैर्नयनयुगलीपुष्करवती
    सती मातस्सत्यं गगननगरीं पाति भवती॥ 23॥

विष्णुपदपत्तनेऽस्मिन्
    विष्णुपदे विष्णुपत्नि ! जगतस्त्वम्।
अस्येशाना युक्तं
    विहरसि धेनुर्हि कामितार्थस्य॥ 24॥

दक्षिणस्य तव दक्षिणः करः
    दक्षिणां विनतरक्षणे क्षमे !।
त्वां विनिर्दिशति विक्षिपन्नघं
    नान्यदस्ति किल तद्विवक्षितम्॥ 25॥

स्थिते मनसि यो नरो मम करोति मुग्धे ! स्मृतिं
    तमेनमपि चान्त्यजैः परिवृतेऽपि देशे मृतम्।
नयामि मम तत्पदं न खलु ते विषादो भवेत्
    इति स्वयमसौ जगौ ननु पुरा त्वया माधवः॥ 26॥

श्रीमान्दण्डधरस्स्वयं जगदिदं प्रायोऽपराधैर्युतं
    शिक्ष्यं वाऽथ नु रक्ष्यमित्यतितरामारूढडोलो हरिः।
अन्त्यं साधु ततो विचार्य भवतीमस्मिन् स्थले जाग्रतीम्
    अङ्गीकृत्य तथोचितां प्रणयिनीं नित्यं क्षमां क्रीडति॥ 27॥

रक्षेत्क्षमां क्षमावान्
    इति किल वाणी पुरातनी मातः।
अयमथ मादृशरक्षण -
    दक्षस्त्वां हि क्षमां प्राप्य॥ 28॥

श्रुतिजातगीतविभवा
    स्वश्रुतिसञ्ज्ञातगीतविभवाऽथ।
अथ च ततोऽपि विशेषात्
    श्रुत्यन्ताचार्यगीतविभवा त्वम्॥ **29**॥

सुधाशपथपत्तनं वसुधया धृतं राजते
    बुधाशयविनोदनं वसुधया च तद्भूषितम्।
मुधाशयपदादिकं यदि न कर्तुमीहा जनाः!
    सदाश्रयमिदं तदा नमत गच्छताकल्मषाः॥ **30**॥

यस्त्वां धत्ते धरणि! महिमा तस्य वक्तुं न शक्यः
    तत्र श्रीमान् फणिपतिरसौ धारकस्ते प्रमाणम्।
यस्स्वं वक्तुं तव वहनतो धन्यमास्ते सहस्र -
    द्वन्द्वश्रीमानिव रसनया सन्ततं लेलिहानः॥ **31**॥

तव किल तनयात्वं प्राप्य कन्या पयोधेः
    अनवधिकृपया सा पूरिता सक्षमाऽभूत्।
इदमिह करटस्योदन्तमप्याशरीणां
    अधिपवनजमुक्तं जानतां भाति मातः!॥ **32**॥

गोरूपमम्ब! दधती भवती कदाचित्
    साकं सुरैस्सकललोकपतेस्समीपम्।
आसीद्गता स च तदा त्वयि वत्सलस्सन्
    गोपालबालकपदं स्वयमाललम्ब॥ **33**॥

श्रीधन्विनव्यपुरभाग्यविपाकजाता
    श्रीविष्णुचित्ततनयेति रसे! कदाचित्।
दिव्यं सुगन्धमतुलं निजकुन्तलानां
    दत्वा सुमेषु दयितस्य मनश्चकर्ष॥ **34**॥

भागीरथी च भवती च पदाम्बुजातात्
जाते पुरा मुररिपोरिति किंवदन्ती।
पूर्वा तु तत्र लवणाकरसङ्गताऽभूद्
मातः ! परा लवणमेव निराचकार॥ **35**॥

मान्ये ! मानिधिमारकेलिदयिते ! मारारिमानप्रदे !
मायावारिणि ! मायया मधुरिपोस्संमोहिनि ! स्वामिनि !।
मालालालितमूर्धजातमहिते ! मन्दारवासैर्नते !
मातर्माधवि ! मञ्जुलाधरदले ! मन्दं दयेथा मयि॥ **36**॥

महीयसीत्यत्र महीति मह्याम्
अधीमहि त्वामथवा नु मातः !।
अणीयसीं त्वामुदरेऽत्युदारे !
मुरारिदारास्सदये ! वद त्वम्॥ **37**॥

मातर्विचित्रं वसनं भवत्याः
निदानमासील्लवणस्य नित्यम्।
अहो कथं वा भवदोदनोऽयं
नित्यं विहीनो लवणेन भाति॥ **38**॥

जलजलोचनयाचलयाऽनया
बलिविलोपनलालनलोलया।
विमलयाऽबलया बलकान्तया
विमलतां हृदयं ह्यवलम्बते॥ **39**॥

नान्यत्प्रसाधनचणं तव भूषणं तत्
त्वामेव भूषणमहं तव निश्चिनोमि।
आत्मानमम्ब ! वसुधामिह भूषयन्ती
यद्व्योमपत्तनगता वसुधे ! विभासि॥ **40**॥

असुरसरणिभाजो नैव मां वेत्तुमीशाः
    सुरसरणिनिविष्टा वेत्तुमीशा भवन्ति।
इति किल परमार्थं बोधयन्ती बुधौघं
    सुरसरणिनगर्यामम्ब ! वासं करोषि॥ **41** ॥

बबन्ध वस्त्रं वसुधे ! त्वदीयं
    ममन्थ चैनं भगवान् कदाचित्।
द्वयं च लक्ष्मीं गलितामवाप्तुं
    तदा तदा तस्य निदानमासीत्॥ **42** ॥

पश्यत्स्वम्ब ! सुरेषु भर्तुरभजद्वक्षो रमा सा द्रुतं
    त्वं नामात्र चिरात् पतिं च तनयान् संवाह्य सम्पुष्यसि।
तत् का वा युवयोर्गरीयसि पदे संस्थापनीया बुधैः
    स्यादित्यत्र वदन्तु शास्त्रनिपुणा मौनं भजामो वयम्॥ **43** ॥

वक्षोऽभजत् पत्युरितीय मन्तोः
    रक्षोधिपस्याप निकेतनं सा।
विष्णोः पदं त्वं त्वपरित्यजन्ती
    विष्णोः पदे यासि पुरे विहारम्॥ **44** ॥

धरे ! सुधाधार इहाधरस्ते
    लक्ष्मीधरं मोहधरं विधत्ते।
धराभिलोलोऽप्यधराभिलोलः
    धरातले येन विराजतेऽसौ॥ **45** ॥

तवाम्बरादेष कदाचिदम्ब !
    कन्याभिधं रत्नमवाप्य धन्यः।
त्वया धरण्या धरणीपतिस्सन्
    तदम्बरश्रीपुरनित्यवासः॥ **46** ॥

पादाम्बुजाते तव मातरेते
    पूर्णाम्बुजातादपि पूर्णशोभे।
यतस्ततो युक्तमिदं सुवाते
    मनाङ्गतस्यापि महत्फलानि॥ **47** ॥

वासस्समस्तं लवणास्पदं ते
    पाकः कथं वा लवणैर्वियुक्तः।
तदस्तु वासस्स्थलमप्यथाम्ब !
    तवाप्रवेश्यं लवणाभियुक्तैः॥ **48** ॥

लवणतिरस्कारपरं
    लावण्यस्यास्पदं मनोहारि।
उदधिवसनं महो नः
    कारुण्यैकोदधिः प्रियं दिशतु॥ **49** ॥

कलानिधिमनोहरं कमलकोमलं निर्मलं
    विलोचनमधुव्रतं विकचनासिकाचम्पकम्।
मनोजविजयास्पदं महितकर्णदृश्यं महि !
    त्वदीयमिदमाननं कथमिहाम्ब ! वर्ण्यं मया?॥ **50** ॥

अञ्चितमखिलैर्लेखैः
    चिन्तितफलदं चिरन्तनं तेजः।
सञ्चितसुकृतैस्सेव्यं
    वञ्चितपापं वियत्पुरे किञ्चित्॥ **51** ॥

करधृतकेलीकमलं
    कल्पककल्पं मनोहराकल्पम्।
करुणानिकरविकारं
    किञ्चित्तेजो वियत्पुरे वसति॥ **52** ॥

यस्मिन्विहरति हृदयं
    व्योमपुरीनायकस्य तत् किमपि।
विहरति वियत्पुरेऽस्मिन्
    विहरति तदिदं पुरं च मम हृदये॥ 53॥

अम्बुधिवसनामम्बुज -
    वदनां नितम्बरमणीयाम्।
अम्बरनगरीविहृतिं
    शम्बरसंहारिसम्पदं नौमि॥ 54॥

पञ्चशरपञ्चबाणीं
    वञ्चनसमये निजस्य दयितस्य।
पञ्चसुरपादपालिं
    चिन्तनसमये निजस्य भक्तस्य॥ 55॥

नारायणप्रियतमां नयनाभिरामां
    नाकाधिनाथविनुतां नलिनायताक्षीम्।
नानाविधां गुणगणैर्नमतां शरण्यां
    नाराधयन्ति हृदये न हि ते मनुष्याः॥ 56॥

राकानिशाकरमुखीं रमणीयरूपां
    रामायणादिगदितां रसभव्यलीलाम्।
रामाकुलोत्तममणिं रघुनाथपूज्यां
    राजाधिराजविधृतां रसना गृणातु॥ 57॥

कृपामयशरीरिणीं कृतमुखैस्सदा संस्तुतां
    कृतान्तपुरवञ्चिकां कृषिमतां फलाकल्पिकाम्।
कृशोदरसुदर्शनां कृतसमस्तलोकप्रियां
    कृपाणसमकुन्तलां कृतवतां हृदि स्वस्ति नः॥ 58॥

जननि ! नरकहन्तुः प्राणकान्तासि सा त्वं
स्वयमपि नरकैकद्वेषिणी संश्रितानाम्।
तदपि नरकमातेत्यत्र संज्ञां ततोऽसौ
कथमपि मम मत्ता हन्त ! गृह्णाति जिह्वा ॥ 59 ॥

मातर्न केवलमसावुरसि त्वदीये
भेजे रतिं कठिनपीनकुचाभिरामे।
एषा रमाऽपि रमणोरसि वासमेति।
तत्तादृशत्वदुरसः परिरम्भणेच्छुः ॥ 60 ॥

“भोक्तुं त्वामहमुत्सुकः” “तदुचितं साकूतमेतत् कथम्?”
“भक्तं निर्लवणं किलात्र भगवन्! मा भुङ्क्ष्व भक्तामिमाम्”।
“यस्मान्मे लवणोदधिर्वसनतामालम्बते किंन्विदम्?”
“तच्चात्रापनयाम्ययीति” युवयोर्हासोद्गमः पातु नः ॥ 61 ॥

“मार्कण्डेयसुते ! मनो हरसि मे मन्मानसादुद्गतः
चन्द्रोऽयं विजितो भवन्मुखसरोजातेन नित्यं यतः”।
“स्वामिन्! यादव ! मन्मथो मनसिजस्सर्वाङ्गशोभान्वितः
नासीत् किं भवता ततो हरसि मां नाथे”ति रम्या रतिः ॥ 62 ॥

“वसुमति !” “सुमते ! किं?” “धाम्न्यसि स्वर्णवर्णा”
“भवसि तदिव च त्वं नाम्न्यपि न्यूनवर्णः”।
“न खलु न खलु नाम्नि स्वर्णवर्णोऽपि धाम्नि
श्रुतिगणगुणितोऽस्मी”त्यम्ब ! पातु स्मितं ते ॥ 63 ॥

मान्यां मनोहरतमां मधुकैटभारेः
मानातिलङ्घिविभवां महनीयमूर्तिम्।
मालाभरैर्विलुलितां मधुतुल्यवाणीं
मायातिरस्कृतिकरीं मनसा स्मरामि ॥ 64 ॥

कामारिपूजितपदां कमनीयगात्रीं
    काङ्क्षाधिकानि ददतीं कटकागतानाम्।
कान्ताय कामविहृतौ कलितातिमोदां
    कामानवाप्तुमधुना कलयामि काञ्चित्॥ **65**॥

अणोरणीयान् महतो महीयान्
    भजत्यजस्रं भगवान् मुरारिः।
अणीयसीं त्वामुदरेऽत्युदारे !
    महीयसीं त्वां जघने स्तने च॥ **66**॥

"कान्ते ! कोपवतीव भासि किमिदं कोवाऽपराधः कृतः"
    "किन्नामाम्बरहारिणेति हरिणाः नो भाषसे वा मया"।
"व्यक्तं चिन्तय सन्त्यजाथ च रुषं या त्वं मया स्थापिता
    नित्यं ह्यम्बरपत्तने मदवनी"त्येवं प्रिये शंसति॥ **67**॥

"गोपीजनस्य मम चाप्यहरोऽम्बरं त्वं
    स्तेन ! त्वमम्बरपुरः परिकीर्तितोऽसि।
भूमौ च सक्तमनसः कथमन्यथेयं
    कीर्तिस्तवेति कितवे"ति ददासि वाचम्॥ **68**॥

जननि ! वसुमतीं त्वां श्रीनिवासस्य कान्तां
    यदि पुनरनपायां संविहायात्र कञ्चित्।
वसुलवपरिदृप्तं तल्लवं प्राप्तुकामः
    परिसरति जनोऽयं तत्तवैवापराधः॥ **69**॥

"सुबन्धुस्त्वं" मातः ! "मुररिपु" मनोमारजननी
    त्वदीयः पापानां मम भवति "चोरो" हि महिमा।
सदा "हर्षं" "माघं" जनयति नतिस्ते चरणयोः
    ततस्स्यां लोकेऽस्मिन्नवनि ! "भवभूति" स्तव दृशा॥ **70**॥

त्वदुपसदनात्पूर्वं शोकस्ततश्च विशोकता
    निखिलदुरिताटोपक्षेपक्षमासि सकृन्नता।
इति किल विदत्यासीदम्ब ! त्वयि प्रणयान्विता
    जलधितनया जन्म त्वत्तो यदाप विदेहभूः ॥ 71 ॥

ऐन्द्रं विमानमधिरुह्य समुज्ज्वलन्तीं
    इन्द्रेण सर्वजगतां दयितेन साकम्।
इन्द्रादिदेवविनुतामवलोक्य मातः
    इन्द्रप्रियेति भवतीं निजगाद वेदः ॥ 72 ॥

आन्दोलिकासु भवतीं जनता वहन्ती
    चाकाशपत्तनगतां धरणीं स्मरन्ती।
आनन्दमम्ब ! नियतं हृदये भजन्ती
    चारोहयन्त्यथ च भात्यवरोहयन्ती ॥ 73 ॥

त्वां यो वहेत बहवः किल तं वहन्ति
    तत्र प्रमाणमिह मे भुजगाधिपोऽसौ।
यस्त्वां निजेन शिरसा विनतो दधानः
    सर्वैरमीभिरधुना ध्रियते महे ते ॥ 74 ॥

द्विजेषु हंसो भवतीं दधाति
    द्विजेषु यः कुण्डलिनां निहन्ता।
नाथं त्वदीयं, युवयोः प्रतीतं
    स्फुटं हि लोके पृथु तारतम्यम् ॥ 75 ॥

ऐन्द्रे चन्द्रप्रभायामपि भुजगपतौ साकमेतेन यान्ती
    मय्यस्मिन् वाहभूते कमलमियमहो वाहमापेति युक्तम्।
लङ्कापुर्यां किलासीदधिकमलमलं स्वामिनी या सतीनां
    तस्या माता हि सेयं स्वयमिति हनुमान् दर्शयत्यादरेण ॥ 76 ॥

राजते गजवरे विराजते
    राजराजनतपादपङ्कजे !।
नायको गजगतिस्सुहंसगा
    त्वं तु हंसगमनेति साम्प्रतम्॥ 77॥

आन्दोलिकान्तरवनीरमणं युवानं
    आसाद्य साधुधिषणा समयं च सायम्।
दृष्ट्वा रतिं कलयितुं कृतकौतुकेयं
    तत्र क्षमेति भवतीमवलोक्य धृत्या॥ 78॥

पुन्नागमम्ब ! पुरुषे पुरतोऽधिरूढे
    सन्नाहमंसमधुरे भवती दधाति।
किन्नाम तेन सहवाहनता गता स्यात्
    यन्नाम गोपवनितासु तदा क्षमावान्॥ 79॥

सुभगतुरगवाहे नायकेऽस्मिन् त्वदीये
    त्वमसि ननु पुरस्तादंसरम्ये निविष्टा।
तुरगमुख तवैतद्युज्यते युज्यतेऽथो
    तुरगवदनभेत्तुश्चेति मन्दस्मितास्या॥ 80॥

रथस्यान्तः स्थायां त्वयि जननि ! भव्ये तव पदे
    ययौ तस्यां वीथ्यां रथ इत लसन् वर्तत इति।
जनानां व्याहारे बहिरपि यथा स्थानमभजत्
    भजत्यन्तःस्थत्वं कथमिति धरे ! चित्रचरिते !॥ 81॥

मृकण्डुतनयात्मजां मृगकिशोररम्येक्षणां
    मृदुस्मितमनोहरां मृदितभक्तपापाचलाम्।
मृदाद्यपररूपिणीं मृगमदादिगन्धोज्ज्वलां
    मृडादिविबुधेडितां मृदुरहं सदा भावये॥ 82॥

न जाने काणादं न च फणिपतेस्तां च फणितिं
    न वा मीमांसां तां न च रसमयीं काव्यसरणिम्।
न चाथो वेदान्ते क्वचिदपि किमप्यम्ब ! कथये
    कथं वेदान्तान्तर्विरचितनिवासां भगवतीम्॥ 83॥

काञ्च्या भवत्याः कमनीयरूपां
    कन्यामयं काञ्चन काञ्चनाङ्गीम्।
आसाद्य बाह्यान्तरभव्यदेशे
    निवेशयामास मुदा पतिस्ताम्॥ 84॥

"कस्त्वं?" "पुराणः पुरुषोऽस्मि सोऽहं"
    "तज्ज्ञायते नाम तु" "तत्तदेव"।
"किमर्थमागाः?" "तव कन्यकार्थं"
    "किं ते सुतः? किं नु सुतोऽस्ति तस्य?" ॥ 85॥

कन्यां त्वदीयां परिणीय तस्यां
    पुत्रं ततः पौत्रमहं लभेय।
हा हा किमेतत्? किमु कामयेत
    कन्यातिबाला स्थविरं प्रयाहि॥ 86॥

" सा चेत् सकामा मयि, देहि मह्यं
    नो चेदहं यामि," "धरे ! धरेऽमुम्।
पितामहं पश्य," "पितः ! स एषः
    पितामहस्यापि पिता पुराणः" ॥ 87॥

"त्वय्युन्मना एष समागतोऽत्र
    कामात्मनः पूरय काममस्य"।
"बालासि सत्यं न मतिस्सती ते,
    पुराणपाके लवणं न दातुम्॥ 88॥

दक्षा, तदन्यं भज, याहि याहि
  नमो नमः पूरुष याहि याहि"।
"ब्रूषे पुराणं किमहो नवीनं
  युवानमेनं जनक! भ्रमो वा" ॥ **89** ॥

"न मे भ्रमो, वां किल सभ्भ्रमोऽयं
  प्रमाद्य जाता युवयोर्गिरेति"।
एवं समाप्ते तव ते पितुश्च
  तवापि कान्तस्य गिरां प्रवाहे ॥ **90** ॥

निमीलिताक्षे तव तातपादे
  विस्फारिताक्षे तव च प्रियेऽस्मिन्।
ब्रह्मादयस्ते विबुधा मुनीन्द्राः
  साकं सुहृद्भिस्समुपागतास्तम् ॥ **91** ॥

देशं पराकाशमिवावलोक्य
  तं विण्णगर् नामयुतं विधाय।
अत्यद्भुतं निस्तुलमाप्तगीतं
  मासे तुलानाम्नि भवद्विवाहम् ॥ **92** ॥

वितेनिरे ते प्रतिवर्षमेवं
  तथैव कोलाहलतोऽधुनापि।
विलोक्यते, विश्वहिताय विश्वे!
  विश्वेन चैवं विहृतिं विधत्से ॥ **93** ॥

पार्श्वे विधाय भवतीमपरत्र तं ते
  तातं च सादरमयं भगवान् विधाय।
आनन्दवृद्धतनुरुन्नतदर्शनीयः
  पादानतानभिमतार्थयुजो विधत्ते ॥ **94** ॥

श्रियो जन्मदेशं पयोजायताक्षः
स्वयं नाम भेजे पदं स्वं विहाय।
भुवो जन्मदेशं भवत्यास्तु सोऽयं
निजेनापि साकं पदेनापि मातः ! ॥ **95** ॥

क्षमेति विश्वम्भरनायिकेति
स्थिरेति रत्नाकरमेखलेति।
धरेति विश्वेति वसुन्धरेति
त्वामीरयन् कालमहं क्षिपेयम् ॥ **96** ॥

त्वद्रक्षणार्थं पुरुषोत्तमोऽयं
कूर्मोऽभवद्धन्त ! तथा वराहः।
प्रीतिः परा चेन्न वरोऽवरत्व -
सम्पर्कदोषं गणयेन्मनुष्यः ॥ **97** ॥

वसुमती भवती शुभदायिनी
भवभयामयवज्जनताहितम्।
कलयितुं ललिता ललनाकृतिः
वसुपतिं वसुदेवसुतं व्यधात् ॥ **98** ॥

बाला बालसरोजसुन्दरमुखी बालेन्दुतुल्यप्रभा
नीला बालदिनेशकान्तिभरितैस्सम्भूषिता भूषणैः।
कालाक्षेपमुनीश्वरस्य तनया कोलादृता देवता
कालान् मे निखिलान् करोतु कृपया सम्मोदसम्पूरितान् ॥ **99** ॥

बाला काऽपि मनोहरा विजयते नीलालकालङ्कृता
मालापूरितकण्ठदेशमधुरा लीलासखी श्रीनिधेः।
कालाम्भोधरकान्तिरम्यवपुषो वेलातिगक्षान्तिभूः
कालाक्षेपमुनीश्वरस्य तनया श्रीलालिता सन्ततम् ॥ **100** ॥

वसुमतीशतकं रचितं मुदा
    वसुमतीजनकेन कवीन्दुना।
वसुमतीप्सितसर्वफलप्रदं
    वसुमतीतलभूषणमेधताम्॥ **101** ॥

॥ इति श्री वसुमतीशतकं समाप्तम्॥